॥ श्रीः ॥

॥ श्रीलक्ष्मीहयवदन लक्ष्मीनारायण वेणुगोपाल परब्रह्मणे नमः ॥



॥ श्री शठकोप रामानुज देशिकेभ्यो नमः ॥

॥ श्री ब्रह्मतन्त्र स्वतन्त्र परकाल गुरुपरम्परायै नमः ॥

## श्रीलक्ष्मीहयग्रीव दिव्यपादुकासेवक
## श्रीमदभिनववागीश ब्रह्मतन्त्र स्वतन्त्र परकाल महादेशिकानां
# अष्टोत्तर शतनामावळी


श्रीमान् उ । वे । सत्पादपद्ममधुमधुव्रतः

महामहोपाध्यायः वाग्देवीवरपुत्रः साङ्गसलक्षणघनपाठी

डा. ए एस् वेङ्कटनाथाचार्यः

श्रीकार्यकर्ता परकालमठास्थानम् महीशूरपुरि


---

॥श्रीमदभिनव वागीश ब्रह्मतन्त्र स्वतन्त्र परकाल यतीन्द्र महादेशिकाय नमः॥

**हयास्यकुलमालोकं वेङ्कटेशकविर्मुदा ।**
**अष्टोत्तरशतं नत्वा नव्यवागीशयोगिनाम् ।।**

**योगिने मन्त्र सिद्धाय हयास्यपदसेविने ।**
**तपोनिष्ठाय धीराय तुरीयपदलक्ष्मणे ।।१।।**

**दान्ताय परमार्थाय कृतिने गुणिने नमः ।**
**यमिने पारलक्ष्याय परमैकान्तिने यते ।।२।।**

**बोधकायार्थिलक्ष्याय सांख्यायामिततेजसे ।**
**सते स्थिराय सिद्धाय ब्रह्मनिष्ठाय भूयसे ।।३।।**

त्रय्यन्तार्थाय नाथाय तारकाय महात्मने ।
श्रीमते मुनयेऽगाधभगवद्भक्ति सिन्धवे ।।४।।

वैराग्यनिधये शास्त्रे विवेक-स्व-प्रकाशिने ।
हंसाय परमहंसाय तत्त्ववेत्रे दयालवे ।।५।।

देशिकायात्मलोकाय ब्रह्मदण्डाय दण्डिने ।
अध्यात्मदीक्षितायास्मै पुरुषाय परात्मने ।।६।।

मङ्गलाय स्वसाध्याय साधनाय प्रकारिणे ।
सत्त्वाय धीमते भोक्त्रे गुरुभावानुरागिणे ।।७।।

स्वाध्यायपदनिष्ठाय पञ्चकालप्रकाशिने ।
सवनत्रयनिष्ठाय शिष्यचित्तापहारिणे ।।८।।

तीक्ष्णाय मृदवे धात्रे विधात्रे दीर्घबन्धवे ।
अनघाय स्मितास्याय स्व-पर-न्यून-दर्शिने ।।९।।

श्रीदण्डाय नृसिंहाय राज्ञे राजस्वदण्डिने ।
लक्ष्मणार्यार्थतत्त्वाय वेदमार्गविधायिने ।।१०।।

अर्थपञ्चकलक्ष्याय संन्यासाश्रमरूपिणे ।
हयास्यार्चाविधानाय त्रिदण्ड स्वप्रमायुजे ।।११।। -प्रमाभुजे

ऊर्ध्वमूलोर्ध्वपुण्ड्राय यज्ञसूत्रानुशासिने ।
नव्यरङ्गेन्द्र शिष्याय नव्यलक्ष्मणभीक्षवे ।।१२।।

परकालपदेशाय ब्रह्मतंत्रस्वतंत्रिणे ।
त्रिकाल ज्ञानयज्ञाय ज्ञानाध्वर्यावभासिने ।।१३।।

स्वापहर्त्यपकाराय स्वापकर्त्रनुरागिणे ।
निर्द्वन्द्वाय स्वतंत्राय सत्यसंधव्रतात्मने ।।१४।।

पादुकार्चनदीक्षाढ्यराजसद्मप्रभास्वते ।
राजस्वपद्म मित्राय भारतायार्षभागिने ।।१५।।

निर्विशेषविशेषार्थतत्त्वभूम्यनुषङ्गिणे ।
भक्तिप्रपत्तितत्त्वार्थ प्रमानुष्ठानलक्ष्मणे ।।१६।।

स्वच्छन्दवृत्तनिष्ठाय स्वार्थच्छन्दप्रवर्तिने ।
विश्वामित्रान्वयार्काय चेतनाय विपश्चिते ।।१७।।

रङ्गासारविहाराय श्रीनिवासविहारिणे ।
श्रीनिवासात्तदीक्षाय शठकोपाप्तमन्त्रिणे ।।१८।।

कृष्णमार्यकृपाप्राप्तमन्त्रदीक्षा प्रमावते ।
द्राविडाम्नाय सूक्त्यर्थमाधुर्यास्वादकारिणे ।।१९।।

यूवोद्भववसन्ताड्यमधु-लोकविराड्युजे ।
पूषानुभू अलक्ष्यार्घमहर्षि पदभोगिने ।।२०।।

चिदचित्परतत्त्वार्थ व्रतषट्पद चारिणे ।
भवच्छिदे, स्वबन्धाय बन्धत्रयविवेकिने ।।२१।।

शरणागत रक्षैकसंकल्पाय स्वचक्षुषे ।
वेदवेदान्त दीपाय ज्ञानचूडास्वबोधिने ।।२२।।

श्रीभाष्यभावबोधार्थ प्रभामण्डललासिने ।
रहस्यत्रयसारार्थग्रहणोज्वलकान्तये ।।२३।।

वागीशपदलक्ष्याय नव्यवागीशयोगिने ।
श्रीहयास्य पदद्वन्द्व वृत्तगोत्रनिवासिने ।।२४।।

व्यतनोद्वेङ्कटो नाथ इत्थमष्टोत्तरं शतं ।
वागीशनव्यवागीश कृपामुद्रात्म लक्ष्मणः ।।

॥ श्रीः ॥

॥ श्रीलक्ष्मीहयवदन लक्ष्मीनारायण वेणुगोपाल परब्रह्मणे नमः ॥



॥ श्री शठकोप रामानुज देशिकेभ्यो नमः ॥

॥ श्री ब्रह्मतन्त्र स्वतन्त्र परकाल गुरुपरम्परायै नमः ॥

# आचार्य स्तुतिः

कील्नीर्कुंड्रं वेलूरीयुण्णि श्रीमान् विजयराघवाचार्यः

---

॥श्रीमदभिनव वागीश ब्रह्मतन्त्र स्वतन्त्र परकाल यतीन्द्र महा देशिकाय नमः॥

श्री ब्रह्मतन्त्रं यतिवर्यमाद्यं सदा हृदन्ते विनिवेशयन्तम् /
लक्ष्मीहयास्यस्य विनोदनोत्कं नमामि वागीशगुरुं नवीनम् // १

चैत्राख्यमासि ह्यवतीर्य यो नः रैवत्य तारे प्रतिबोधयन् पराम् /
विद्यामविद्यातमसोऽपनोदकं नमामि वागीशगुरुं नवीनम् // २

स्वसुस्मिताह्लादमनोहरैः शुभैः दृग्भिः दयार्द्रैः प्रधिनोति नो यः /
स्वशिष्यनिःश्रेयसि बद्धदीक्षं नमामि वागीशगुरुं नवीनम् // ३

त्रिदण्डकाषायपवित्रसूत्रैः तथोर्ध्वपुण्ड्रैः सुमनोहरं यतिम् /
तं स्मारयन्तं यतिराजराजं नमामि वागीशगुरुं नवीनम् // ४

दयाग्रणीः सर्वगुरूत्तमाप्त कृपाभिरापूरितसागरोपमः /
मन्त्रोत्तमैर्यान्त्रितमानसस्तं नमामि वागीशगुरुं नवीनम् // ५

यदीय पादाम्बुज संश्रयेच्छाऽप्यघौघविध्वंसपटीयसी तथा /
यच्छायया संसृतितापनाशनं नमामि वागीशगुरुं नवीनम् // ६

इत्थं गुरुं चिन्तयताममीभिः स्तोत्रैः प्रगायन् परकालसूरिणम् /
नवीनवागीशगुरूत्तमं मुदा समस्तकल्याणगुणाश्रयन्ते // ७

॥ श्रीः ॥

॥ श्रीलक्ष्मीहयवदन लक्ष्मीनारायण वेणुगोपाल परब्रह्मणे नमः ॥



॥ श्री शठकोप रामानुज देशिकेभ्यो नमः ॥

॥ श्री ब्रह्मतन्त्र स्वतन्त्र परकाल गुरुपरम्परायै नमः ॥

# नव्य-वागीश स्तुतिः - मङ्गलं

श्रीमान् उ। वे। वेणुगोपालः

बेंगळूरु

---

॥श्रीमदभिनव वागीश ब्रह्मतन्त्र स्वतन्त्र परकाल यतीन्द्र महा देशिकाय नमः॥

अभिगम्याय सर्वेषां दयाशीलादिभिः गुणैः

नव्यवागीशवर्याय परकालाय मङ्गलम् ॥१॥

शान्तिभक्तिविरक्त्यादि-मुक्तारत्नौघशालिने।

मङ्गलं सुगभीराय नव्यवागीशसिंधवे ॥२॥

तपस्विनेऽपि शान्ताय सर्वज्ञायाऽपि मौनिने ।

मैत्रीगुणसमाश्लिष्टैः गुणैः जुष्टाय मङ्गलम् ॥३॥

मन्त्रसिद्धाय बुद्धाय ज्ञानवृद्धाय योगिने ।

भक्तिवैराग्यरूपाय मङ्गलं हंसरूपिणे ॥४॥

जिह्वाग्रविलसन्मन्त्रराजायाऽऽजानशुद्धये ।

श्रीभाष्यादि-महाग्रन्थ-सारज्ञायाऽस्तु मङ्गलम् ॥५॥

ब्रह्मवर्चसपूर्णाय तेजसोज्ज्वलिताय च ।
स्पृहणीयचरित्राय निस्स्पृहायास्तु मङ्गलम् ॥ ६ ॥

भव्याय भवितव्याय भवाभावाय भूष्णवः ।
भावयन्ति यमेवान्तः तस्मै भव्याय मङ्गलम् ॥ ७ ॥

कोपावलेपदूराय करुणामृतवर्षिणे ।
विलसन्मन्दहासाय तस्मै सौम्याय मङ्गलम् ॥ ८ ॥

श्रीहयास्याज्ञया लब्ध-तुरीयाश्रमसेविने ।
नव्यवागीशगुरवे तस्मै सेव्याय मङ्गलम् ॥ ९ ॥

धर्मं सञ्चालयामास यश्चतुर्भिः पदैरपि ।
कलौ पद्भ्यां चलन्नेव तस्मै श्रेष्ठाय मङ्गलम् ॥ १० ॥

सर्वे चात्मगुणाः सर्वाः विद्याः सर्वाः च सिद्धयः ।
यमेवाश्रित्य दीव्यन्ति तस्मै दिव्याय मङ्गलम् ॥ ११ ॥

मङ्गलं श्रीहयग्रीवनित्यकैङ्कर्यशालिने ।
नव्यवागीशमुनये भूयो भूयोऽस्तु मङ्गलम् ॥ १२ ॥

॥ श्रीः ॥

॥ श्रीलक्ष्मीहयवदन लक्ष्मीनारायण वेणुगोपाल परब्रह्मणे नमः ॥



॥ श्री शठकोप रामानुज देशिकेभ्यो नमः ॥

॥ श्री ब्रह्मतन्त्र स्वतन्त्र परकाल गुरुपरम्परायै नमः ॥

# अस्माकं परकालमठ स्वामी

माकरल् घटाम्बु अनिरुद्ध दासः (बालकः)

बेंगळूरु

---

॥श्रीमद्भिनव वागीश ब्रह्मतन्त्र स्वतन्त्र परकाल यतीन्द्र महादेशिकाय नमः॥

अस्माकं स्वामी श्रीमदभिनव वागीशब्रह्मतन्त्रस्वतन्त्र परकाल महादेशिकः। सः श्रीब्रह्मतन्त्रस्वतन्त्र परकाल मठस्य षट्त्रिंशः पीठाधिपतिः अस्ति। स्वामी १९९२ तमे वर्षे पिठाधिपतिः आसीत् । सः २२ वर्षाः हयग्रीवाय मठाय च कैंकर्यम् अकरोत् ।

सः श्रीलक्ष्मीहयग्रीवस्य विग्रहाय भगवदाराधनं करोति। एतत् विग्रहः देशिकेन आराधितः आसीत् । स्वामी एकः महात्मा अस्ति।

सः अधिकसमयं दीर्घतपसि भवति। स्वामी इदानीमपि सक्रियः स्वतन्त्रः च भवति। स्वामी तस्य कार्यं भक्त्या करोति।
स्वामी मम पञ्चसंस्कार आचार्यः अपि भवति। एतत् मम परमभग्यं परमसुकृतं च अस्ति।

श्रीमते श्रीलक्ष्मीहयग्रीव दिव्यपादुकासेवक श्रीमदभिनव वागीशब्रह्मतन्त्रस्वतन्त्र परकाल महादेशिकाय नमो नमः।

माकरल् घटाम्बु अनिरुद्ध दासः (बालकः)

॥ श्रीः ॥

॥ श्रीलक्ष्मीहयवदन लक्ष्मीनारायण वेणुगोपाल परब्रह्मणे नमः ॥

॥ श्री शठकोप रामानुज देशिकेभ्यो नमः ॥

॥ श्री ब्रह्मतन्त्र स्वतन्त्र परकाल गुरुपरम्परायै नमः ॥




- श्रीमती सहना संपत्कुमार्